ज्वर:। हिमाम्भ:। विविधक्षीरेक्षुविकार:। अन्नानि। पत्रशाकम्। अजाङ्गलमांसम्। असात्म्यमन्नम्। विदाहि। विष्टम्भि। गुरूणि। कटु। अम्लम्। शीतम्। लवणम्। व्यवाय:। व्यायाम:। उच्चै: परिभाषणम्। प्रियाममालोकनम्। अह्नि निद्रा। प्रजागरम्। नितान्तचंक्रमणम्। यथास्थितं प्रागधिरोपणम्। नस्यम्। ताम्बूलम्। अजीर्णता। प्रचण्डवात:। आतप:। धूम:। दृष्टि:। रज:। भयम्। क्रोध:। वमि:। प्रहर्ष:। शोक:। विरुद्धाशनम्। अम्बुपानम्। तीक्ष्णम्। उष्णम्। रूक्षम्। विघट्टनम्। कण्डूयनम्। काष्ठनखादितोद:। निरन्नभाव:। विषमोपचार:॥ * ॥

अथ भग्ने पथ्यम्।

शीताम्बु। चन्दनम्। पङ्कप्रदेह:। बन्धनक्रिया। शालि:। प्रियङ्गु:। गोधूम:। मुद्गसतीलयोर्यूष:। नवनीतम्। घृतम्। क्षीरम्। तैलम्। मांसरस:। मधु। पटोलम्। लशुनम्। शिग्रु। पत्तूरम्। बालमूलकम्। द्राक्षा। धात्री। वज्रवल्ली। लाक्षा। बृंहणम्॥ * ॥

भग्ने अपथ्यम्।

लवणम्। कटुकम्। क्षार:। अम्ल:। मैथुनम्। आतप:। व्यायाम:। रूक्षान्नम्॥ * ॥

अथ भगन्दरे पथ्यम्।

आमे संशोधनम्। लेप:। लङ्घनम्। रक्तमोक्षणम्। पक्वे यथाविधिशस्त्रवह्निक्षारकर्म्माणि। सर्षप:। शालि:। मुद्ग:। विलेपी। जाङ्गलरस:। पटोलम्। शिग्रु। वेत्राग्रम्। पत्तूरम्। बालमूलकम्। तिलसर्षपयोस्तैलम्। तिक्तवर्ग:। घृतम्। मधु॥ * ॥

भगन्दरे अपथ्यम्।

विरुद्धान्यन्नपानानि। विषमाशनम्। आतप:। व्यायाम:। मैथुनम्। युद्धम्। पृष्ठयानम्। गुरूणि। रूढव्रणोऽपि नर: सम्वत्सरं एतत् सर्व्वं परिहरेत्॥ * ॥

अथोपदंशे पथ्यम्।

छर्द्दि:। विरेक:। ध्वजमध्यनाड़ीवेध:। जलौका। परिपातनम्। सेक:। प्रलेप:। यव:। शालय:। धन्वामिषम्। मुद्गरस:। घृतम्। कठिल्लकम्। शिग्रुफलम्। पटोलम्। शालिञ्चशाकम्। नवमूलकम्। तिक्तम्। कषायम्। मधु। कूपवारि। तैलम्॥ * ॥

उपदंशे अपथ्यम्।

दिवानिद्रा। मूत्रवेग:। गुर्व्वन्नम्। मैथुनम्। गुड़:। आयास:। अम्लम्। तक्रम्॥ * ॥

अथ शूकदोषे पथ्यम्।

लेप:। विरेक:। असृङ्मोक्ष:। सर्पि:पानम्। शालि:। यव:। जाङ्गलमांसम्। मुद्गयूष:। कठिल्लकम्। पटोलम्। शिग्रु। कर्कोटम्। पत्तूरम्। बालमूलकम्। वेत्राग्रम्। आषाढ़फलम्। दाड़िमम्। सैन्धवम्। वचा। कूपोदकम्। गन्धसार:। कस्तूरी। हिमवालुका। तक्रम्। कषायम्। तैलम्॥ * ॥

शूकदोषे अपथ्यम्।

मूत्रवेग:। दिवानिद्रा। व्यायाम:। मैथुनम्। गुड़:। विदाहि। गुरुद्रव्यम्। तक्रम्॥ * ॥

अथ कुष्ठरोगे पथ्यम्।

पक्षात् पक्षात् छर्द्दनम्। मासात् मासाद्विरेचनम्। त्र्यहात् त्र्यहात् नस्यम्। षष्ठे षष्ठे मासि असृमोक्षणम्। सर्पिर्लेप:। पुराणा: यवगोधूमशालिमुद्गाढ़कीमसूरा:। माक्षिकम्। जाङ्गलामिषम्। आषाढ़फलम्। वेत्राग्रम्। पटोलम्। बृहतीफलम्। काकमाची। निम्बपत्रम्। लशुनम्। हिलमोचिका। पुनर्नवा। मेषशृङ्गम्। चक्रमर्द्दलम्। भल्लातकम्। पक्वतालम्। खदिर:। चित्रक:। वरा। जातीफलम्। नागपुष्पम्। कुङ्कुमन्। प्रननहवि:। कोषातकी। करञ्जोमातिलसर्षपनिम्बेङ्गुदीभवतैलम्। लघूनि अन्नानि। सरलदेवाकृशिंशपागुरुसम्भवस्नेह:। गोखरोष्ट्राश्वमहिषीणां मूत्राणि। कस्तूरिका। गन्धसार:। तिक्तानि। क्षारकर्म्म॥ * ॥

कुष्ठरोगे अपथ्यम्।

पापकर्म्म। कृतघ्नभाव:। गुरुनिन्दा। गुरुधर्षणम्। विरुद्धपानाशनम्। दिवानिद्रा। चण्डांशुताप:। विषमाशनम्। स्वेद:। रतम्। वेगरोध:। इक्षु:। व्यायाम:। अम्लम्। तिल:। माष:। द्रवगुरुनवान्नानां भोजनम्। विदाहि। विष्टम्भि। मूलकम्। सह्याद्रिविन्ध्याद्रिसमुद्भवनदीजलम्। आनूपमांसम्। दधि। दुग्धम्। मद्यम्। गुड़:॥ * ॥

अथ शीतपित्तोदर्द्दकोठरोगेषु पथ्यम्।

छर्द्दि:। विरेचनम्। लेप:। असृङ्मोक्ष:। पुराणशालि:। जाङ्गलामिषमुद्गकुलत्थानां यूष:। कर्कोटकम्। कारवेल्लम्। शिग्रु। मूलकपोतिका। शालिञ्चशाकम्। वेत्राग्रम्। दाड़िमम्। त्रिफला। मधु। कटुतैलम्। तप्तनीरम्। पित्तश्लेष्महरद्रव्यम्। सर्व्वकटुतिक्तकषायाणि॥ * ॥

शीतपित्तादावपथ्यम्।

विविधक्षीरेक्षुविकार:। मत्स्य:। उदकानूपभवामिषम्। नवीनमद्यम्। वमिवेगरोध:। प्राग्दक्षिणाशापवन:। अह्नि निद्रा। स्नानम्। विरुद्धाशनम्। आतप:। स्निग्धम्। अम्लम्। मधुरम्। कषाय:। गुर्व्वन्नपानानि॥ * ॥

अथाम्लपित्ते पथ्यम्।

ऊर्द्ध्वगे पूर्व्वं वमनम्। अधोगे पूर्व्वं विरेचनम्। पश्चादन्नाशनम्। निरूह:। शालि:। यव:। गोधूम:। मुद्ग:। जाङ्गलजरस:। तप्तशीतजलानि। शर्करा। मधु। शक्तु:। कर्कोटकम्। कारवेल्लम्। पटोलम्। हिलमोचिका। वेत्राग्रम्। वृद्धकुष्माण्डम्। रम्भापुष्पम्। वास्तूकम्। कपित्थम्। दाड़िमम्। धात्री। तिक्तानि। कफपित्तहरपानान्नम्॥ * ॥

अम्लपित्ते अपथ्यम्।

नवान्नम्। विरुद्धद्रव्यम्। पित्तकोपकरद्रव्यम्। वेगरोध:। तिल:। माष:। कुलत्थ:। तैलभक्षणम्। अविदुग्धम्। धान्याम्लम्। लवणम्। अम्लम्। कटु। गुर्व्वन्नम्। दधि। मत्स्य:॥*॥

अथ विसर्पे पथ्यम्।

विरेक:। वमनम्। लेप:। लङ्घनम्। रक्तमोक्षणम्। पुराणा यवगोधूमकङ्गुषष्टिकशालय:। मुद्ग:। मसूर:। चणक:। तुवरी। जाङ्गलजरस:। नवनीतम्। घृतम्। द्राक्षा। दाड़िमम्। कारवेल्लकम्। वेत्राग्रम्। फुलकम्। धात्री। खदिर:। नागकेशरम्। लाक्षा। शिरीष:। कर्पूरम्। चन्दनम्। तिललेपनम्। ह्रीवेरकम्। मुस्तकम्। सकलानि तिक्तानि॥

विसर्पे अपथ्यम्।

व्यायाम:। अह्नि शयनम्। सुरतम्। प्रवात:। क्रोध:। शोक:। वमनम्। वेग:। अध्ययनम्। शाकम्। विरुद्धाशनम्। दधि। कूर्च्चिका, सौवीरकादि। अनेकविधकिलाट:। गुर्व्वन्नपानम्। लशुनम्। कुलत्थ:। माष:। तिल:। सकलमजाङ्गलमांसम्। स्वेद:। विदाहि। लवणम्। अम्लम्। कटु। मद्यम्। अर्कप्रभा॥*॥

अथ विस्फोटे पथ्यम्।

विरेचनम्। छर्द्दनम्। लेप:। लङ्घनम्। पुरातनषष्टिकशालय:। यव:। मुद्ग:। मसूर:। चणक:। मुकुष्टक:। धन्वामिषम्। गव्यघृतम्। कठिल्लकम्। वेत्राग्रम्। आषाढ़फलम्। पटोलम्। ज्योतिष्मती। निम्बदलम्। चन्दनम्। तैलम्। सिताभ्र:। तिललेप:। लङ्घनम्। वालम्॥ * ॥

विस्फोटे अपथ्यम्।

स्वेद:। व्यवाय:। व्यायाम:। क्रोध:। गुर्व्वन्नम्। आतप:। वमिवेग:। पत्रशाकम्। प्रवात:। दिवास्वप्न:। ग्राम्योदकम्। आनूपमांसम्। विरुद्धान्यशनानि। तिल:। माष:। कुलत्थ:। लवणाम्लकटूनि। विदाहि। रूक्षम्। उष्णम्॥ * ॥

अथ मसूर्य्यां पथ्यम्।

पूर्व्वं लङ्घनवान्तिरेचनशिरावेधा:। शशाङ्कोज्ज्वलजीर्णषष्टिकशालय:। चणक:। मुद्ग:। मसूर:। यव:। कपोतचटकदात्यूहक्रौञ्चजीवञ्जीवशुकादय: पक्षिण:। नङ्गल:। काठिल्लम्। आषाढ़कम्। कर्कोटम्। कदलम्। शिग्रु। रुचकम्। द्राक्षा। दाड़िमम्। मेध्यबृंहणान्नपानम्। कोलम्। माषरस:। अक्ष्णो: सेकविधौ मवेधुमधुकोद्भूतसुशीतोदकम्। शम्बूकोदरकोषनीरम्। कर्पूरचूर्णम्। पक्वे मुद्गरस:। जाङ्गलरस:। शालिञ्चशाकम्। घृतम्। निर्गुण्डीजलम्। यत्तधूपविहितो धूप:। शम्बद्गोमयभस्मगुण्डनम्। शुष्के शिलापिष्टयो: पिचुमर्द्दपत्रनिशयोरालेप:। शेषे व्रणोक्तक्रिया॥ * ॥